# सुन्दरकाण्ड द्वात्रिंशः सर्गः (३२) - सीता हनुमान् दर्शणम्

ततः शाखान्तरे लीनं दृष्ट्वा चलित मानसा ।
वेष्टितार्जुन वस्त्रं तं विद्युत् सङ्घात पिङ्गलम् ॥ १ ॥

सा ददर्श कपिं तत्र प्रश्रितं प्रिय वादिनम् ।
फुल्लाशोकोत् कराभासं तप्तचामी करेक्षणम् ॥ २ ॥

साऽथ दृष्ट्वा हरिश्रेष्ठं विनीतव दवस्थितम् ।
मैथिली चिन्तयामास विस्मयं परमं गता ।
अहो भीममिदं रूपं वानरस्य दुरासदम् ॥ ३ ॥

दुर्निरीक्ष्य मिति ज्ञात्वा पुनरेव मुमोह सा ।
विललाप भृशं सीता करुणं भय मोहिता ॥ ४ ॥

रामरामेति दुःखार्ता लक्ष्मणेति च भामिनी ।
रुरोद बहुधा सीता मन्दं मन्दस्वरा सती ॥ ५ ॥

सा तं दृष्ट्वा हरिश्रेष्ठं विनीतव दुपस्थितम् ।
मैथिली चिन्तयामास स्वप्नोऽयमिति भामिनी ॥ ६ ॥

सा वीक्षमाणा पृथु भुग्न वक्त्रं
शाखा मृगेन्द्रस्य यथोक्त कारम् ।
ददर्श पिङ्गाधिपते रमात्यं
वातात्मजं बुद्धिमतां वरिष्ठम् ॥ ७ ॥

सा तं समीक्ष्यैव भृशं विसञ्ज्ञा
गतासु कल्पेव बभूव सीता ।

चिरेण सञ्ज्ञां प्रतिलभ्य भूयो
विचिन्तयामास विशाल नेत्रा ॥ ८ ॥

स्वप्ने मयाऽयं विकृतोऽद्य दृष्टः
शाखामृगः शास्त्र गणैर् निषिद्धः ।
स्वस्त्यस्तु रामाय सलक्ष्मणाय
तथा पितुर्मे जनकस्य राज्ञः ॥ ९ ॥

स्वप्नोऽपि नायं न हि मेऽस्ति निद्रा
शोकेन दुःखेन च पीडितायाः ।
सुखं हि मे नास्ति यतोऽस्मि हीना
तेनेन्दु पूर्ण प्रति माननेन ॥ १० ॥

रामेति रामेति सदैव बुद्ध्या
विचिन्त्य वाचा ब्रुवती तमेव ।
तस्यानु रूपां च कथां तमर्थम्
एवं प्रपश्यामि तथा शृणोमि ॥ ११ ॥

अहं हि तस्याद्य मनोभवेन
सम्पीडिता तद्गत सर्व भावा ।
विचिन्तयन्ती सततं तमेव
तथैव पश्यामि तथा शृणोमि ॥ १२ ॥

मनोरथः स्या दिति चिन्तयामि
तथापि बुद्ध्या च वितर्कयामि ।
किं कारणं तस्य हि नास्ति रूपं
सुव्यक्त रूपश्च वदत्ययं माम् ॥ १३ ॥

नमोऽस्तु वाचस्पतये स वज्रिणे
स्वयम्भुवे चैव हुताशनाय च ।
अनेन चोक्तं यदिदं ममाग्रतो
वनौकसा तच्च तथाऽस्तु नान्यथा ॥ १४ ॥

इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये सुन्दरकाण्डे द्वात्रिंशः सर्गः
॥ ३२ ॥